# Shri Ganesha Stuti Svayambhuvakrita

# સ્વાયમ્ભુવકૃતા શ્રીગણેશસ્તુતિઃ

## Document Information

Text title : Shri Ganesha Stuti Svayambhuvakrita

File name : gaNeshastutiHsvAyambhuvakRRitA.itx

Category : ganesha, mudgalapurANa, stuti

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM dvitIyaH khaNDaH | adhyAyaH 5 | 2.5 42-63||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 5, 2024

*sanskritdocuments.org*

# સ્વાયમ્ભુવકૃતા શ્રીગણેશસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥
સ્વાયમ્ભુવ ઉવાચ ।
નમસ્તે ગજવક્ત્રાય હેરમ્બાય નમો નમઃ ।
ઓઙ્કારાકૃતિરૂપાય સગુણાય નમો નમઃ ॥ ૪૨॥
નૈર્ગુણ્યે ગજરૂપાય સદા બ્રહ્મસુખાત્મને ।
ગણેશાય સદા ભક્તપોષકાય નમો નમઃ ॥ ૪૩॥
નરકુઞ્જરરૂપાય યોગાભેદાય તે નમઃ ।
ચતુર્બાહુધરાયૈવ પુરુષાર્થપ્રસિદ્ધયે ॥ ૪૪॥
નાનાભોગધરાયૈવાનન્તલીલાસ્વરૂપિણે ।
વિઘ્નરાજાય દેવાય ભક્તવિઘ્નવિદારિણે ॥ ૪૫॥
સત્યાસત્યમયાયૈવાવ્યક્તભેદાત્મને નમઃ ।
સ્વાનન્દપતયે તુભ્યં સદા સ્વાનન્દદાયિને ॥ ૪૬॥
નમસ્તે મૂષકારૂઢસર્વાન્તરસુભોગિને ।
નાનામૃતસમુદ્રે ચ ક્રીડાકર નમોઽસ્તુ તે ॥ ૪૭॥
સિદ્ધિબુદ્ધિપતે તુભ્યં દ્વેધામાયાપ્રસારિણે ।
ભક્તેભ્યો યોગદાત્રે ચ યોગાકારાય તે નમઃ ॥ ૪૮॥
વેદોપનિષદાં લભ્યમહાવાક્યમયાય તે ।
બ્રહ્મભૂતાય વૈ તુભ્યં નમસ્તે બ્રહ્મરાશયે ॥ ૪૯॥
કિં સ્તૌમિ ત્વાં ગણાધીશ યત્ર વેદાશ્ચ વિસ્મિતાઃ ।
યોગિનઃ શેષમુખ્યા વૈ શઙ્કરાદ્યા મહેશ્વરાઃ ॥ ૫૦॥
તથાપિ તવ જાતેન દર્શનેન ગજાનન ।
સ્ફૂર્તિઃ પ્રાપ્તા તયા નાથ સંસ્તુતોઽસિ મયા પ્રભો ॥ ૫૧॥
અહો ભાગ્યમહો ભાગ્યં યેન દૃષ્ટો ગજાનનઃ ।
વેદાન્તાગોચરો ગમ્યો ધન્યોઽહં જગતીતલે ॥ ૫૨॥
ધન્યો મે જનકો દેવ તપો જ્ઞાનં કુલં પ્રભો ।

વિદ્યા વ્રતાદિકં સર્વં ધન્યં તે પાદદર્શનાત્ ॥ ૫૩॥
ઇતિ સ્તુત્વા શ્રીગણાધીશં ભક્ત્યા પરમયા યુતઃ ।
સરોમાઞ્ચોઽભવત્તત્ર પ્રણનામ પુનઃ પુનઃ ॥ ૫૪॥
તમુત્થાપ્ય ગણાધીશોઽગાદીત્તં ભક્તમુત્તમમ્ ।
વરં વૃણુ મહાભાગ યસ્તે મનસિ વર્તતે ॥ ૫૫॥
કૃતં ત્વયા મદીયં યત્ સ્તવનં તોષકારકમ્ ।
પઠતે શ‍ૃણ્વતે ચાપિ સર્વદં પ્રભવિષ્યતિ ॥ ૫૬॥
પુત્રપૌત્રાદિવિભવપ્રદં શોકવિનાશનમ્ ।
ધનધાન્યસમૃદ્ધ્યાદિપ્રદં ભાવિ ન સંશયઃ ॥ ૫૭॥
ધર્માર્થકામમોક્ષાણાં સાધનં બ્રહ્મદાયકમ્ ।
દૃઢભક્તિકરં મે ચ ભવિષ્યતિ ન સંશયઃ ॥ ૫૮॥
ઇતિ બ્રુવન્તં વિઘ્નેશમુવાચ મનુસત્તમઃ ।
સ્વાયમ્ભુવઃ પ્રસન્નાત્મા કૃતાઞ્જલિરુદારધીઃ ॥ ૫૯॥
મનુરુવાચ ।
યદિ પ્રસન્નતાં યાતસ્તદા દેહિ ગજાનન ।
ભક્તિં દૃઢાં ત્વદીયાં મે યયા મોહો ન વિદ્યતે ॥ ૬૦॥
સૃષ્ટેઃ કરણસામર્થ્યં ધર્મપાલનમુત્તમમ્ ।
પ્રજારક્ષકતાં દેહિ દેવ દેવેશ મે ચિરમ્ ॥ ૬૧॥
યદ્યદિચ્છામિ વિઘ્નેશ તત્તત્ સિધ્યતુ સર્વદા ।
તવ ભક્તેષુ વાસો મે સદા ભવતુ માનદ ॥ ૬૨॥
તથેતિ તમુવાચાદાવન્તર્ધાનં ચકાર હ ।
ગણેશાનો નિજે લોકેઽગમદ્ધૈ ભક્તવત્સલઃ ॥ ૬૩॥

ઇતિ સ્વાયમ્ભુવકૃતા શ્રીગણેશસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં દ્વિતીયઃ ખણ્ડઃ । અધ્યાયઃ ૫ । ૨.૫ ૪૨-૬૩॥

- .. mudgalapurANaM dvitIyaH khaNDaH . adhyAyaH 5 . 2.5 42-63..

Proofread by Yash Khasbage, Preeti Bhandare

*Shri Ganesha Stuti Svayambhuvakrita*

pdf was typeset on June 5, 2024

Please send corrections to *sanskrit@cheerful.com*